# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-३ ( Yearly )**  **प्रश्नपत्र-४**  **गुणाः - १००**

**विषयः - पुराणेतिहासः**  **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २१-०४-२०१६**  **सन्दर्भग्रन्थः - अग्निपुराणम्, गरूडपुराणम्**

---

**अग्निपुराणे प्रश्नाः**

**प्रश्नः -१ निम्नाङ्कितेषु चतुर्णां श्लोकानां ससन्दर्भं भावार्थो लेख्यः ।** **२०**

*(१) स्वकीया परकीया च पुनर्भूरिति कौशिकाः ।*
*सामान्या च पुनर्भूरि इत्याद्या बहुभेदतः ॥*

*(२) अपारे काव्यसंसारे कविरेव प्रजापतिः ।*
*यथा वै रोचते विश्वं तथेदं परिवर्तते ॥*

*(३) वाग्विद्या सम्प्रतिज्ञाने रीतिः सापि चतुर्विधा ।*
*पाञ्चाली गौंडदेशीया वैदर्भीलाटजा तथा ॥*

*(४) बीभत्साधूतशांताख्यः स्वभावाश्चतुरो रसाः ।*
*लक्ष्मीरिव विनात्यागान्न वाणी भाति नीरसा ॥*

*(५) वक्ष्ये व्याकरणं सारं सिद्धशब्दस्वरूपकम् ।*
*कात्यायन विबोधाय बालानां बोधनाय च ॥*

**प्रश्नः -२ प्रश्नद्वयस्य सविस्तरणोत्तरं लिखत ।** **२०**

*(१) काव्यलक्षणं विलिख्य ग्रन्थोक्तिशा रसभेदान् लिखत ।*

*(२) रीतिनिरूपणं विधाय नायकप्रकारान् लिखत ।*

*(३) माहेश्वरसूत्राणि विलिख्य व्याकरणमहत्त्वं लिखत ।*

*(४) व्याकरणसंधिभेदान् विलिख्य विसर्गसन्धिस्वरूपं यथोदाहरणं लिखत ।*

**प्रश्नः -३ कस्याप्येकस्योत्तरं लिखत ।** **१०**

*(१) पुराणेषु अग्निपुरापणं समीक्षत ।*

*(२) एकाक्षरकोषविषये यथाग्रन्थं लिखत ।*

**गरूडपुराणे प्रश्नाः**

**प्रश्नः -४ निम्नाङ्कितेषु चतुर्ण्णां श्लोकानां ससन्दर्भं भावार्थो लेख्यः ।** **२०**

*(१) गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे ।*
*स्वर्गापवर्गस्य फलार्ज्जनाय भवन्ति भूयः पुरुषाः सुरत्वात् ।*

*(२) अकृते तु वृषोत्सर्वे परलोकगतिर्न हि ।*
*तस्मात् कृष्ण वृषोत्सर्गः कर्तव्य इति मे श्रुतम् ॥*

*(३) पितृपीडा भवेद्यत्र कृत्यैरन्यैर्न मुच्यते ।*
*तस्मात्सर्वप्रयत्नेन पितृभक्तिपरो भवेत् ॥*

(४) लवणं तद्रसं दिव्यं सर्वकामप्रदं नृणाम् ।
यस्मादन्नरसाः सर्वे नोत्कटा लवणं विना ॥

(५) जले विषुणः स्थले विष्णुर्विष्णुः पर्वतमस्को ।
ज्वालामालाकुले विष्णुः सर्वं विष्णुमयं जगत् ॥

(६) जितेन्द्रियाः जिताहारः संतः सत्यपरायणाः ।
यजंतः परया भक्त्या विष्णुमाद्यं जगद्गुरुप् ॥

**प्रश्नः –५ प्रश्नद्वयस्य सविस्तरणोत्तरं लिखत । २०**

*(१) आत्मश्राद्धादिनिरूपणम् ।*

*(२) वृषोत्सर्गविधिकालादिनिरूपणम् ।*

*(३) शवदाहविधिनिरूपणम् ।*

*(४) दशावतारनिरूपणम् ।*

**प्रश्नः –६ कस्याप्येकस्योत्तरं लिखत । १०**

*(१) प्रेतकल्पस्य सारं निरूपयत ।*

*(२) नरकयातानां विस्तारेण लिखत ।*

---------------------